प्रश्नः – चिपिटकचर्वणमाश्रित्य तान्त्रिकस्य चरित्रवर्णनं समासेन संस्कृतभाषया देवनागरलिप्या च क्रियताम्।

उत्तरम् – चिपिटकचर्वणम् इत्यत्र प्रहसने तान्त्रिकस्य महान् प्रभावो दृश्यते। अत्र तान्त्रिकस्य चरितम् अपि पताकानायकस्य चरितम्। तान्त्रिकः प्रवञ्जकत्वेन प्रतीयमानोऽपि वस्तुतः स न प्रवञ्चकः। वस्तुतः स व्यवहारे अतीव कुशलः। स आगत्य एव दीर्घकालं यावत् क्षरन्तीं रुधिरधारां शर्कराप्रयोगेण शीघ्रम् एव अरुणत्।

स बुद्धिमान्, प्रत्युत्पन्नमतिः, वाक्चतुरः, सहनशीलः, क्रियाकर्मसु कुशलः, लोभहीनः, परोपकारी च।

स कपालिनः चरितं सम्यग् विचार्य एव कपालिनः गृहं प्रविष्टः। यदा कपाली तं प्रवञ्चकं प्रतिपादयितुं यतते स्म तदा सः झटिति एव कपालिनः चरितम् उद्घाटयन् विचित्रान् श्लोकान् सृष्ट्वा कपालिनः उपायं व्यर्थीकृतवान्। यदा तेषां श्लोकानाम् आकरम् अपृच्छत् कपाली तदा अपि सद्योजातसंहिता इति श्लिष्टेन शब्देन तस्य समुचितम् उत्तरं प्रादात् सः। एतेन तस्य बुद्धिमत्ता प्रत्युत्पन्नमतिता च स्फुटं भवति। झटिति एव स कपालिनः धनापहरणाय उपायं रचयित्वा अतीव कौशलेन तम् उपायं सार्थकम् अकरोत्। तस्य वाक्चातुर्यम् अपि विशिष्टम्। तस्य वाक्चातुर्येण एव कपाली पराभूतः भवति।

यदा कपाली तं प्रवञ्चकं कथयति तदा स कुपितः न भूत्वा सहनशीलतां प्रदर्शयति। स यदि अभिलषति तर्हि कपालिनं वञ्चयित्वा किञ्चिद् धनं स्वस्य कृते अपि अपहर्तुं समर्थः भवति। किन्तु स तथा नैव आचरति। स निर्लोभः जनः। तस्य सर्वः अपि प्रयत्नः वस्तुतः रङ्गिण्यै किञ्चिद् धनं प्रदातुम् एव। तत् कर्तुं स कपालिनः दुर्वचनानि अपि असहत। अस्मिन् कर्मकाण्डे अपि तस्य महत् कौशलम् अस्ति इति तस्य क्रियाकलापेन प्रतिभाति।

इत्थं तान्त्रिकः कथायाः फलसाधने विशिष्टं यत्नं करोति नाट्यकारः कुशलतया तस्य चरितं रचितवान् इत्यलं विस्तरेण इति दिक्॥